# गोपी गीत

जयति तेऽधिकं जन्मना व्रजः
श्रयत इन्दिरा शश्वदत्र हि ।
दयित दृश्यतां दिक्षु तावकास्त्वयि
य धृतासवस्त्वां विचिन्वते ।। १ ।।

शरदुदाशये साधुजातसत्-
सरसिजोदरश्रीमुषा दृशा ।
सुरतनाथ तेऽशुल्कदासिका
वरद निध्नतो नेह किं वधः ।। २ ।।

विषजलाप्ययाद् व्यालराक्षसाद्
वर्षमारुताद् वैद्युतानलात् ।
वृषमयात्मजाद् विशतो भयादृषभ
ते वयं रक्षिता मुहुः ।। ३ ।।

न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक् ।
विखनसाऽर्थितो विशगुप्तये
सख उदेयिवान् सात्वतां कुले ।। ४ ।।

विरचिताभयं वृष्णिधुर्य ते
चरणमीयुषां संसृतेर्भयात् ।
करसरोरुहं कान्तं कामदं
शिरसि धेहि नः श्रीकरग्रहम् ।। ५ ।।

व्रजजनार्तिहन् वीर योषितां

निजजनस्मयध्वंसनस्मित ।

भज सखे भवत्किङ्करी: स्म नो

जलरुहाननं चारु दर्शय ।। ६ ।।

प्रणतदेहिनां पापकर्शनं

तृणचरानुगं श्रीनिकेतनम् ।

गोपी गीत फणिफणार्पितं ते पदाम्बुजं

कृणु कुचेषु नः कृन्धि हृच्छयम् ।। ७ ।।

मधुरया गिरा वल्गुवाक्यया

बुधमनोज्ञया पुष्करेक्षण ।

विधिकरीरिमां वीर मूह्यतीरधरसीधुनाऽऽ

प्यायस्व नः ।। ८ ।।

तव कथामृतं तप्तजीवनं

कविभिरीडितं कल्मषापहम् ।

श्रवणमंङ्गलं श्रीमदाततं

भुवि गृणन्ति ते भूरिदा जना: ।। ९ ।।

प्रहसितं प्रिय प्रेमवीक्षणं

विहरणं च ते ध्यानमङ्गलम् ।

रहसि संविदो या हृदिस्पृशः

कुहक नो मन: क्षोभयन्ति हि ।। १० ।।

चलसि यद् व्रजाच्चारयन् पशून्

नलिनसुन्दरं नाथ ते पदम् ।

शिलतृणाङ्कुरैः सीदतीति नः

कलिलतां मनः कान्त गच्छति ।। ११ ।।

दिनपरिक्षये नीलकुन्तलै-

र्वनरुहाननं बिभ्रदावृतम् ।

घनरजस्वलं दर्शयन् मुहु-

र्मनसि नः स्मरं वीर यच्छसि ।। १२ ।।

प्रणतकामदं पद्मजार्चितं

धरणिमण्डनं ध्येयमापदि ।

चरणपंकजं शन्तमं च ते

रमण नः स्तनेष्वर्पयाधिहन् ।। १३ ।।

सुरतवर्धनं शोकनाशनं

स्वरितवेणुना सुष्ठु चुम्बितम् ।

इतररागविस्मारणं नृणां

वितर वीर नस्तेऽधरामृतम् ।। १४ ।।

अटति यद् भवानह्नि काननं

त्रुटिर्युगायते त्वामपश्यताम् ।

कुटिलकुन्तलं श्रीमुखं च ते

जड उदीक्षतां पक्ष्मकृद् दृशाम् ।। १५ ।।

पतिसुतान्वयभ्रातृबान्धवा-

नतिविलङ्घ्य् तेऽन्त्यच्युतागताः ।

गतिविदस्तवोद्गीतमोहिताः

कितव योषितः कस्त्यजेन्निशि ।। १६ ।।

रहसि संविदं हृच्छयोदयं

प्रहसिताननं प्रेमवीक्षणम् ।

बृहदुरः श्रियो वीक्ष्य धाम ते

मुहुरतिस्पृहा मुह्यते मनः ।। १७ ।।

ब्रज वनौकसां व्यक्तिरङ्ग ते

वृजिनहन्त्र्यलं विशमङ्गलम् ।

त्यज मनाक् च नस्त्वत्स्पृहात्मनां

स्वजनहृद्रुजां यन्निषूदनम् ।। १८ ।।

यत्ते सुजातचरणाम्बुरुहं स्तनेषु

भीताः शनैः प्रिय दधीमहि कर्कशेषु ।

तेनाटवीमटसि तद् व्यथते न किंस्वित्

कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ।। १९ ।।